National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 264-268
© 2026 NJHSR
www.sanskritarticle.com

**सुधामयी पति**
शोधच्छात्रा, धर्मशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**सुधामयी पति**
शोधच्छात्रा, धर्मशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# संस्कारतत्त्व-संस्कारसारदृष्ट्या उपनयनसंस्कारः

## सुधामयी पति

[ ***सारांशः*** *– प्रस्तुत लेखेऽस्मिन् आदौ संस्कारतत्त्व–संस्कारसारदृष्ट्या संस्कारस्य स्वरूप भेदादिविषये कथयित्वा ततः शैक्षिकसंस्कारेषु प्रमुखसंस्कारः उपनयनसंस्कारस्य स्वरूप-काल-प्रयोगादिविषये स्मृति-सूत्र-पुराण-निबन्धादि वचनानि समुत्थाप्य विचारः स्यात्। अध्ययनार्थमाचार्य्यसमीपं नीयते येन कर्मणा तदुपनयनमिति कर्मणो नामधेयं तेन कर्मणा योजयेत्। तत्र गर्भाष्टमेऽष्टमे ब्राह्मणस्योपनयनम्, एकादशे राजन्यस्य, द्वादशे वैश्यस्य। अथातीतः कालः आषोडशात् ब्राह्मणस्य, आद्वाविंशात्क्षत्रियस्य, आचतुर्विंशाद् वैश्यस्य, अत ऊर्ध्वं पतितसावत्रीका भवन्ति। नैनानुपनयेत्, नाध्यापयेत्, न याजयेत्, नैव विवहेयुरिति। पुनश्च उपनयनस्य काम्यकालत्वेन अपि पृथक् पृथक् कालः परिलक्ष्यते। यथा- ब्राह्मणस्य ब्रह्मवर्चसकामनायां गर्भात् पञ्चमे वर्षे उपनयनं कारयेत्, क्षत्रियस्य बलकामनायां गर्भात् षष्ठे वर्षे उपनयनं कारयेत्, वैश्यस्य अर्थकामनायां गर्भात् अष्टमे वर्षे उपनयनं कारयेत्। तत्र उपनयने तृतीया, एकादशी, पञ्चमी, द्वादशी, द्वितीयादितिथयः शुभाः । पुनः वासरेषु रवि-बुध-गुरु-शुक्राः शुभाः। नक्षत्रेषु हस्तत्रय-आदित्य-रिपुत्रय-शक्र-इन्दु-पुष्य-अश्विनि-रेवतीच शुभाः। तदवत् राशिषु ब्राह्मणानां कृते वृषभः, तुला, कन्या उपनयने प्रसिद्धाः। क्षत्रियाणां कृते सिंहः, धनुः, मीनश्च प्रसिद्धाः। वैश्यानां कृते मेष, मिथुन, कर्कश्च प्रसिद्धाः। पुनश्च मासेषु माघ-फाल्गुन-चैत्र-वैशाख-ज्यैष्ठ-आषाढेति षट् मासाः उपनयने प्रसिद्धाः। तदवत् ऋतुष्वपि विप्राणां कृते वसन्ते, क्षत्रियाणां ग्रीष्मे, वैश्यानां शरदि उपनयनं करणीयम्। पुनश्च विप्राणां, क्षत्रियाणां तु उत्तरायणे उपनयनं कार्यम्। वैश्यानां तु दक्षिणायने उपनायनं कार्यम्। तथैव मन्वन्तरादित्वेन चैत्रशुक्लतृतीया, आषाढशुक्लदशमी उपनयनकृते निषिद्धा। युगादित्वेन वैशाखशुक्लतृतीयापि उपनयने निषिद्धा। इति।* ]

निषेकादारभ्य श्मशान पर्यन्तं सम्पूर्णमानवजीवनं संस्कारमयम्। अर्थात् जन्मात्प्राग् मरणात्परं पर्यन्त तस्य व्याप्तिः। तत्र ब्राह्मो दैव भेदेन संस्कारस्य द्वैविधत्वमाप्नोति संस्कारसारकारेण। एतयोः ब्राह्मसंस्कारस्तु गर्भाधानादि स्नानान्तः। तथैव दैवस्तु पाकयज्ञाः, हविर्यज्ञाः, सौम्याश्चेति। तत्र ब्राह्मसंस्कारैः संस्कृतजनः ऋषीणां समानतां सायुज्यं च प्राप्नोति। तदवत् दैव संस्कारैः संस्कृतजनः देवानां समानतां सायुज्यं च प्राप्नोति।

पुनश्च तत्र संस्काराणां संख्याविषये उभयत्र [1]हारीतवचनानुसारेण प्राप्यते यत्-गर्भाधानवदुपेतो ब्रह्मगर्भसन्दधाति। पुंसवनात् पुंसीकरोति। फलस्तपनान्माता पितृजं पाप्मानमपोहति। रेतोरक्तगर्भोपघातः पञ्चगुणो जातकर्मणा प्रथममपोहति। नामकरणेन द्वितीयं, प्राशनेन तृतीयं, चूडाकरणेन चतुर्थं, स्नानेन पञ्चमं एतैरष्टभिः संस्कारैः गर्भोपघातात् पूतो भवति। उपनयनाद्याभिरष्टाभिर्व्रतचर्याभिरन्तर्व्रतैश्चाष्टाभिः स्वछन्दसि निरूढो ब्राह्मणः परं पात्रं देपपितृणां भवति। छन्दसां पारग इति।

अस्यार्थः गर्भाधानवद् गर्भाधानविधिना विष्णुर्योनि कल्पयत्वित्यादिना उपेतः स्त्रियमुपगतः। ब्रह्मगर्भं सन्दधातीति। ब्रह्म वेदः ब्रह्मलोकमित्यादिश्रुतेः। तद्ग्रहणयोग्यं गर्भं सन्दधाति सञ्जनयति। पुंसीकरोति अव्यक्तलिंगं गर्भं पुमांसं करोति। पुमांसं पुत्रं विन्दस्वेति मन्त्रवर्णनात् फलस्तपनाङ्गकं सीमन्तोन्नयनात्, मातृपितृजं मातृपितृद्वारा जातम्। गर्भस्थस्याश्रयसंस्कारद्वारा। उपघातः पापसङ्घः, पञ्चगुणः

पञ्चप्रकारः, उपापतकः जातिभ्रंशकरणसंङ्करीकरण- मलिनीकरणा-पात्रीकरणरूपपापपञ्चकं संक्रामतीति जयस्वामी। ततश्च शोणित-गर्भान्तर्गते रेतसि मातृपितृद्वारा पञ्चप्रकारं पापं संक्रामतीति तन्निवृत्तये सीमन्तोन्नयनमर्थवत् इति यावत्। अष्टौ व्रतचर्या। उपनयनादिमेखलेत्यादि ऊर्ध्वमेता इत्यन्ता वक्ष्यमाणा, अन्तर्व्रतानि आदेशविमोकवन्ति वेदभागग्रहणार्थानि सावित्रगौदानिकव्रतिक आदित्यव्रत औपनिषद् ज्यैष्ठमासिकमहानाम्निक-भौतिकानि। स्वच्छन्दो वेदयुक्त इति।

यद्भवतु तत्र संस्काराणां संख्याविषये मतभिन्नता परिलक्ष्यते। केषाञ्चित् मतानुसारेण षोडशसंस्काराः अपरेषां तु पञ्चविंशतिः, अन्ये केचन चत्वारिंशत् अष्टचत्वारिंशत् वा संस्काराणि प्रतिपादितानि। तथापि तत्तद् गृह्यसूत्रानुसारेण तथा तथा कर्माणि अनुष्ठेयानि इति संस्कारसारकारस्याशयः। यथा प्राप्यते तत्र [2]आश्वालयन वचनानुसारेण-

**अतः परं द्विजातीनां संस्कृतिर्नियतोच्यते।**
**संस्काररहिता ये तु तेषां जन्म निरर्थकम्।**
**स्वे स्वे गृह्ये यथा प्रोक्तास्तथा संस्कृतयोऽखिलाः।**
**कर्त्तव्या भूतिकामेन नान्यथा सिद्धिमृच्छति। इति।**

एवं रूपेण तत्र सामान्येन संस्काराणां संख्या स्वरूपादिविषये उभयग्रन्थदृष्ट्या आलोच्य अधुना उपनयनसंस्कारविषये उभयो ग्रन्थदृष्ट्या आलोच्यते।

अथ **उपनयनम्**

शैक्षिकसंस्कारेषु प्रमुखसंस्कारः भवति उपनयनसंस्कारः। अध्यापनार्थमाचार्य्यसमीपं नीयते येन कर्मणा तदुपनयनमिति कर्मणो नामधेयं तेन कर्मणा योजयेत्। प्राप्यते यत् स्मृतिवचनानुसारेण [3]संस्कारतत्त्वे-

**गृह्योक्तकर्मणा येन समीपं नीयते गुरुः।**
**वालो वेदाय तद्योगात् वालस्योपनयनं विदुः। इति।**

प्रसङ्गेऽस्मिन् [4]संस्कारसारे स्मृतिवचनानुसारेण-

**उपनीय तु यः शिष्यं वेदमिति।**

तत्र उपनयनस्य कालविषये गोभिलगृह्यसूत्रवचनानुसारेण [5]संस्कारतत्वे प्राप्यते यत्-

गर्भाष्टमेषु ब्राह्मणमुपनयेत्। गर्भैकादशेषु क्षत्रियं गर्भद्वादशेषु वैश्यम्। आषोडशाद् ब्राह्मणस्यानतीतः कालो भवति आद्वाविंशात् क्षत्रियस्य आचतुर्विंशाद्वैश्यस्य, अत ऊर्ध्वं पतितसावित्रीका भवन्ति। नैतानुपनयेयुर्नाध्यापयेयुर्न एभिर्विवाहयेयुः।

पुनश्च आश्वलायनगृह्यसूत्रानुसारेण [6]संस्कारसारे प्राप्यते यत्-

गर्भाष्टमेऽष्टमे ब्राह्मणस्योपनयनम्, एकादशे राजन्यस्य, द्वादशे वैश्यस्य। अथातीतः कालः आषोडशात् ब्राह्मणस्य, आद्वाविंशात्क्षत्रियस्य, आचतुर्विंशाद् वैश्यस्य, अत ऊर्ध्वं पतितसावत्रीका भवन्ति। नैनानुपनयेत्, नाध्यापयेत्, न याजयेत्, नैव विवहेयुरिति।

अतः प्रामुख्येन ब्राह्मणस्योपनयनकालस्तु गर्भात् अष्टमे वर्षे, क्षत्रियस्य गर्भात् एकादशे वर्षे, वैश्यस्य गर्भात् द्वादशे वर्षे। प्रसङ्गेऽस्मिन् [7]संस्कारसारे शङ्खवचनानुसारेणापि-

**गर्भाष्टमे ब्राह्मणम्, एकादशे राजन्यं, द्वादशे वैश्यमिति।**

पुनश्च [8]गौणकालत्वेन ब्राह्मणस्य आषोडशाद्, क्षत्रियस्य आद्वाविंशात्, वैश्यस्य आचतुर्विंशाद् एतत्तु उपनयनस्य परमावधिः अतः उर्द्धं अनुपनीतः बालकः पतितसावित्रीका व्रात्या इति कथ्यते। तेन सह उपनयन-अध्यापन-विवाहादिसम्पर्कं नैव स्थापनीयम्।

पुनश्च उपनयनस्य काम्यकालत्वेन अपि पृथक् पृथक् कालः परिलक्ष्यते। यथा- ब्राह्मणस्य ब्रह्मवर्चसकामनायां गर्भात् पञ्चमे वर्षे उपनयनं कारयेत्, क्षत्रियस्य बलकामनायां गर्भात् षष्ठे वर्षे उपनयनं कारयेत्, वैश्यस्य अर्थकामनायां गर्भात् अष्टमे वर्षे उपनयनं कारयेत्। प्राप्यते यत् [9]मनुवचनानुसारेण-

**ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।**
**राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे। इति।**

प्रसङ्गेऽस्मिन् [10]गार्ग्येणापि-

**मेधाकामी तु पञ्चमेब्दे वीर्यकामी तु सप्तमे।**
**धनकाम्यष्टमे कुर्यात् ब्राह्मणादिरुपायनम्। इति।**

एवंरूपेण तत्र उपनयनस्य मुख्य-गौण-काम्यकालविषये उभयोः ग्रन्थकारयोः समानता परिलक्ष्यते। केवलं तत्र संस्कारसारे आश्वालयनगृह्यसूत्रानुसारेण उपनयनस्य मुख्यकालप्रसङ्गे किञ्चिद् भिन्नता परिलक्ष्यते। यथा- ब्राह्मणस्य उपनयनकालस्तु न केवलं गर्भाष्टमे वर्षे अपितु विकल्पेन जन्माष्टमे वर्षे अपि भवितुमर्हति, तदवत् अन्येषामपि क्षत्रियस्य गर्भाद् जन्माद्वा एकादशवर्षे, वैश्यस्य गर्भाद् जन्माद्वा द्वादशे वर्षे उपनयनमिति।

अधुना उपनयनसंस्कारे तिथिनक्षत्रादिविषये उभयग्रन्थदृष्ट्या विचार्यते। तत्रादौ उपनयनाख्यसंस्कारे शुभाशुभतिथिविषये [11]संस्कारसारे प्राप्यते यत्-

**तृतीयैकादशी चाद्य पञ्चमी द्वादशी तथा।**
**द्वितीयायां च मेधावी भवेदर्थबलान्वितः।**
**रिक्तायमर्थहानिः स्यात् पौर्णमास्यान्तथैव च।**
**प्रतिपद्यपि चाष्टम्यां कुलवृद्धिविनाशकृत्।**
**सप्तम्यामष्टम्याञ्च प्रतिपदि रिक्ताचतुर्दश्याम्।**
**आयुर्विद्यानाशो व्रतबन्धे त्रयोदश्यां वा।**
**न च षष्ठ्यामथाष्टम्यां पञ्चदश्याञ्च पर्वणि।**
**प्रतिपत्सु न कर्तव्यो न विष्टिकरणे तथा।**
**रिक्तासु वा न कर्त्तव्यरहस्पक् दिवसन्तथा।**
**न विपज्जन्मतारासु नैधनं प्रत्यपरासु च।**
**सम्पत्करे तथा क्षेम्यां साधके मैत्रसंज्ञिके।**
**परमेप्यथमैत्रे च नाशः सर्वत्र शोभनः। इति।**

अतः तृतीया, एकादशी, पञ्चमी, द्वादशी, द्वितीयादितिथिषु उपनयने बालकः मेधावी अर्थबलयुक्तश्च भवेत्। रिक्तातिथिषु पूर्णिमायां च उपनयनकरणे अर्थहानिः भवति। प्रतिपद्यष्टमीतिथयोः उपनयने

कुलवृद्धिविनाशः स्यात्। पुनश्च सप्तमी, अष्टमी, प्रतिपदी, त्रयोदशी, चतुर्दशी, रिक्तातिथिषु उपनयने आयुर्विद्यानाशश्च भवति।

पुनः वासरेषु रवि-बुध-गुरु-शुक्राः शुभाः। प्राप्यते[12]संस्कारसारे यत्-

**विद्यारम्भे नृणां वाराः कुर्वन्ति तपनादयः।**
**आयुः जाड्यं मृतिं प्रज्ञां बुद्धिं सिद्धिं च पञ्चताम्। इति।**

केचन बुधमपि परित्यजति। तेषां मते रवि-गुरु-शुक्राः उपनयने शुभवासराः। प्राप्यते यत् [13]संस्कारसारे-

**वारेषु शुक्रार्कबृहस्पतीनां हितानुबन्धा द्विजमुञ्जबन्धः। इति।**

प्रसङ्गेऽस्मिन् [14]संस्कारतत्त्वेऽपि प्राप्यते यत्-

**वाराः सितार्केज्यकाः।**

पुनः उपनयने शुभनक्षत्रविषये [15]संस्कारसारे उपलभ्यते यत्-

**हस्तत्रयादित्यरिपुत्रयश्च शाक्रेन्दुपुष्याश्विनिरेवतीषु।**

[16]तथैव- **हस्तत्रये पुष्यधनिष्ठयोश्च पौष्णाग्निसौम्यादितिसौम्यभेषु।**
**शस्ते तिथौ चन्द्रबलेन युक्ते कार्यो द्विजानां व्रतबन्धमौञ्जी। इति।**

प्रसङ्गेऽस्मिन् [17]संस्कारतत्त्वेऽपि-

**स्वातीशक्रधनाश्विमित्रकरभे पौष्णेज्यचित्राहरिष्वेन्दौ**
**तोयपतौ भगेदितिसुते भाद्रद्वये सागरे।**
**केन्द्रस्थे भृगुजेऽङ्गिरः शशिशुभे चन्द्रे च तारे शुभे**
**कर्त्तव्यं व्रतकर्म मङ्गलतिथौ वाराः सितार्केज्यकाः। इति।**

तदवत् राशिषु ब्राह्मणानां कृते वृषभः, तुला, कन्या उपनयने प्रसिद्धाः। क्षत्रियाणां कृते सिंहः, धनुः, मीनश्च प्रसिद्धाः। वैश्यानां कृते मेष, मिथुन, कर्कश्च प्रसिद्धाः। प्राप्यते यत् [18]संस्कारसारे-

**वृषभश्च तुला कन्या ब्राह्मणानामुदाहृतम्।**
**संहो धन्वी तथा मीनः क्षत्रियाणां प्रकीर्त्तितः।**
**मेषो युग्मस्तथाकार्कीं वैश्यानां परिकीर्त्तितः।**
**कुर्यात्तु कालवर्षे च तत्रोपनयनं द्विजः। इति।**

पुनश्च मासेषु माघ-फाल्गुन-चैत्र-वैशाख-ज्यैष्ठ-आषाढेति षट् मासाः उपनयने प्रसिद्धाः। यथा प्राप्यते [19]संस्कारसारे सुरेश्वरवचनानुसारेण-

**माघे मासि महाधनो धनपतिः प्रज्ञावले फाल्गुने।**
**मेधावी भवति व्रतोपनयने चैत्रे च वेदान्वितः।**
**वैशाखे शुभगः सुखी पटुमतिर्ज्यैष्ठे बलिष्ठो बुधः।**
**आषाढेऽपि महाविपक्षविजयी ख्यातो महापण्डितः। इति।**

तथैव [20]संस्कारतत्त्वे कृत्यचिन्तामणिवचनानुसारेण-

**माघे द्रविणशीलाढ्यः फाल्गुने च दृढव्रतः।**
**चैत्रे भवति मेधावी वैशाखे कोविदो भवेत्।**
**ज्यैष्ठे गहननीतिज्ञ आषाढे क्रतुभाजनः।**
**शेषेष्वन्येषु रात्रिः स्यान्निषिद्धं निशि च व्रतम्। इति**

तदवत् ऋतुष्वपि विप्राणां कृते वसन्ते, क्षत्रियाणां ग्रीष्मे, वैश्यानां शरदि उपनयनं करणीयम्। प्रसङ्गेऽस्मिन् प्राप्यते यत् [21]संस्कारसारे गार्ग्यवचनानुसारेण-

**विप्रं वसन्ते क्षितिपन्निदाघे वैश्यं घनान्ते व्रतिनं विदध्यात्। इति।**

तत्र उपनयने अयन विचारप्रसङ्गे उभयत्र प्राप्यते यत्- विप्राणां, क्षत्रियाणां तु उत्तरायणे उपनयनं कार्यम्। वैश्यानां तु दक्षिणायने उपनायनं कार्यम्। अनध्याये, संक्रमणदिवसे उपनयनं न करणीयम्। केवलं नैमित्तिक प्रायश्चित्तरूपं यदुपनयनं तत् अनध्यायेऽपि कर्तुं शक्यते। यथा उपलभ्यते [22]गार्ग्यवचनानुसारेण-

**विप्रस्य क्षत्रियस्यापि मौञ्जीस्यादुत्तरायणे।**
**दक्षिणे तु विशां कुर्यान्नानध्याये न संक्रमे।**
**अनध्याये तु कुर्वीत यस्तु नैमित्तिको भवेत्। इति।**

तथैव [23]मन्वन्तरादित्वेन चैत्रशुक्लतृतीया, आषाढशुक्लदशमी उपनयनकृते निषिद्धा। युगादित्वेन वैशाखशुक्लतृतीयापि उपनयने निषिद्धा।

एवंरूपेण तत्र उपनयनाख्यसंस्कारे प्रसिद्धः अप्रसिद्धः तिथिवारनक्षत्रकालादिप्रसङ्गे उभयग्रन्थकारयोः मतयोः समानत्वं प्रायशः परिलक्ष्यते। केवलं तत्र उद्धृतानि वचनानि पृथग् पृथग् न तु अभिमते पृथगता इति।

यद्भवतु अधुना उपनयनसंस्कारे धृत वस्त्रोपवीत मेखलादिविषये उभयग्रन्थदृष्ट्या विचार्यते। तत्रादौ वासांसि विषये [24]संस्कारसारे प्राप्यते यत्-

**वासांस्यानुपूर्व्येण शाणक्षौमाविकानि चेति।**

अतः ब्राह्मणानां शाणं(शणमयं) शणतन्तुनिर्मितं वस्त्रं भवेत्, क्षत्रियाणां क्षौमं([25]क्षुमा अतसी तस्या इदं क्षौमं) तसरादि निर्मितम्, वैश्यस्य आविकं(अविर्मेषः) मेषरोमनिर्मितमिति। पुनः केचन क्षौमवस्त्रन्तु ब्राह्मणानां कृते, क्षत्रियाणां कृते कार्पासं, वैश्यानां कृते कुतुपः([26]पर्वतीयछागरोमनिर्मितः) स्वीकृतानि। यथा उपलभ्यते यमवचनानुसारेण [27]संस्कारसारे-

**क्षौमकार्पासकुतुपश्चर्मवल्कलकम्बलाः।**
**सर्वन्तु धारयेच्छुक्लं वासस्तत् पारिधानिकम्। इति।**

संस्कारतत्त्वकारेण तु शाणं, क्षौमं, उभयं ब्राह्मणस्य कृते, क्षत्रियस्य कृते कार्पासं, वैश्यस्य कृते आविकमिति स्वीकृतम्। यथा प्राप्यते [28]तत्रैव-

**क्षौमं शाणं वा ब्राह्मणस्य कार्पासं क्षत्रियस्य आविकं वैश्यस्य। इति।**

पुनश्च अजिनं तु ब्राह्मणानां कृष्णमृगचर्मनिर्मितं, क्षत्रियानां रूरुमृगचर्मः अर्थात् गौरमृगचर्मनिर्मितं, वैश्यानां तु वस्ताजिनम् अर्थात् छागचर्मनिर्मितं भवेत्। प्राप्यते यत् [29]संस्कारसारे मनुवचनानुसारेण-

**कार्ष्णं रौरववास्तानि चर्माणि ब्रह्मचारिणः।**
**वासांस्यत्रानुपूर्वेण शाणक्षौमाविकानि च। इति।**

प्रसङ्गेऽस्मिन् [30]संस्कारतत्वकारेणापि गोभिलवचनानुसारेण-

**ऐणेषुरौरवाजानि अजिनानि। इति।**

ततः उपवीतं विप्रस्य कार्पाससूत्रनिर्मितं, क्षत्रियस्य शणसूत्रनिर्मितं, वैश्यस्य आविकसूत्रनिर्मितं भवेत्। यथा उपलभ्यते [31]संस्कारसारे मनुवचनानुसारेण-

**कार्पासमुपवीतं स्यात् विप्रस्योर्ध्ववृतं त्रिवृत्।**
**शणसूत्रमयं राज्ञा वैश्यस्याविकसूत्रकम्। इति।**
एतेषामभावे कानि उपवितानि तद्विषये देवलवचनानुसारेण [32]संस्कारसारे प्राप्यते यत्-

**कार्पाशिक्षौमगोबालशणवल्कतृणोद्भवम्।**
**सदा सम्भवतो धार्यमुपवीतं द्विजातिभिः। इति।**
तच्च उपवीतं विप्रस्य [33]ऊर्ध्ववृत्तम् अर्थात् ऊर्ध्वस्थितेन दक्षिणकरेण यद्वलितं तत्, तथा [34]त्रिवृत्तं च उपवीतं कुर्यात्। तत्र वामाद्वृत्तं त्रिवृत्तं कृत्वा प्रदक्षिणमावर्त्तयन् नवगुणं कुर्यात्, तदेव च त्रिसरं कार्यम् इत्येतदुक्तं त्रिवृत्तञ्चोपवीतमिति।
ततः मेखला विषये उभयत्र [35]मनुवचनानुसारेण प्राप्यते यत्-

**मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्या विप्रस्य मेखला।**
**क्षत्रियस्य तु मैर्वी ज्या वैश्यस्य शणतान्तवी।**
**मुञ्जाभावे तु कर्त्तव्याः कुशाश्मन्तकवल्वजैः।**
**त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव च। इति।**
अतः विप्रस्य मेखला मौञ्जी, क्षत्रियस्य मैर्वीज्या, वैश्यस्य शणतन्तुनिर्मितं भवेत्। एतेषामभावे वर्णक्रमानुसारेण क्रमशः कुश-अश्मन्तक-वल्बजैः निर्मितं मेखला गृह्णीयात्।
ततः दण्डस्तु ब्राह्मणस्य बिल्व-पालाशयोः वा निर्मितं भवेत्, क्षत्रियस्य वट-खादिरयोः वा निर्मितं भवेत्, वैश्यस्तु पीलु-उदुम्बरयोः वा अश्वत्थस्य वा निर्मितं भवेत्। प्राप्यते यत् [36]संस्कारसारे मनुवचनानुसारेण-

**ब्राह्मणो बैल्वपालाशौ, क्षत्रियो वटखादिरौ।**
**पैलवोदुम्बरौ वैश्यो तृतीयोऽश्वत्थजस्तथा। इति।**
प्रसङ्गेऽस्मिन् [37]संस्कारतत्त्वे किञ्चित् भिन्नरूपेण मनुवचनमिदं प्राप्यते यथा-

**ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ।**
**वैणवोडुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः। इति।**
तत्र वैश्यस्य पीलुवृक्षस्य दण्डस्य स्थले संस्कारतत्त्वकारेण वेणुदण्डस्य उल्लेखः क्रियते। दण्डस्य परिमाणविषयेऽपि उभयत्र [38]मनुवचनानुसारेण प्राप्यते यत्-

**केशान्तिकं ब्राह्मणस्य दण्डः कार्यः प्रमाणतः।**
**ललाटसंमितो राज्ञः स्यात्तु नाशान्तिको विशः। इति।**
अतः ब्राह्मणस्य दण्डः केशान्तिकं, क्षत्रियस्य ललाटसम्मितम्, वैश्यस्य नाशान्तिकं भवेत्। सः च दण्डः ऋजु-अव्रण-सौम्यदर्शन-अनुद्वेगकर-स्वत्वच-अनग्निदूषितश्च भवेत्। यथा प्राप्यते उभयत्र [39]मनुवचनानुसारेण-

**ऋजवस्ते तु सर्वे स्युरव्रणा सौम्यदर्शनाः।**
**अनुद्वेगकरो नॄणां सत्वचोऽनग्निदूषिताः। इति।**
एवंरूपेण तत्र उपनयनसंस्कारे धृत वस्त्रोपवीतमेखलादिविषये उभयोः ग्रन्थकारयोः मतयोः प्रतिपादनपुरस्सरं उपनयनाख्यकर्मस्य अनुष्ठानप्रकारविषये विचार्यते। तत्र संस्कारसारकारेण आश्वलायन-गृह्यसूत्रानुसारेण उपनयन कर्मस्यानुष्ठानप्रकाराः उपस्थाप्यते। [40]तद्यथा- अष्टमादौ वर्षे उपनयनकर्ताचार्यः पूर्वोक्तवस्त्राजिनादि सम्पाद्य स्वस्तिवाचननान्दीश्राद्धञ्च स्वगृह्योक्तमार्गेण विधायोत्तरेद्युः कृतमङ्गलस्नानं कुमारं सम्यगलङ्कृत्व आशिषो वाचयित्वा तिथ्यादिसंकीर्त्य द्विजत्वसिध्यर्थं मम कुमारमुपनेष्ये इति संकल्प्य सुमूहूर्त्ते स्वसमीपमानीय तन्मुखमवलोक्य स्वगृह्योक्तविधिना उपलेपनाद्यानि प्रतिष्ठान्तं कर्म कृत्वा चिकीर्षितोपनयनकर्मणि द्रव्यदेवतापरिग्रहार्थमन्वाधानं करिष्ये इति संकल्प्यास्मिन्नन्वा-हितेऽग्नौ सद्यो यक्ष्ये इति संकल्प्य परिसमूहनाद्याज्यसंस्कारपर्यन्तं पूर्ववत् कृत्वाचार्य उत्थायाग्नेः पश्चादवस्थाय कुमारं प्राङ्मुखमवस्थाप्य कार्पाससूत्रमाबध्य यज्ञोपवीतं धृत्वा कुमारमाज्यादियज्ञाङ्गाद्दुत्तरः प्राङ्मुख उदङ्मुखोपविश्य बर्हिष्या-ज्यासादनान्तं कर्म विधायाज्यभागवर्जमाघारान्तं कृत्वा अतनआ-युंषीत्यादिभिः चतुर्भिः मन्त्रैः चतस्र आज्याहुतिर्हुत्वाचार्य गुरुमध्ये कुमारं स्थापयित्वा तत्सवितुरिति आदि मन्त्रेण देवस्य त्वेति तद् हस्तं गृह्णन् अमुकशर्मन्निति दक्षिणकरणे कुमाराङ्गुष्ठदक्षिणं पाणिं गृहीत्वा पूर्ववदुदकमापूर्य ब्रह्मचारिणे सूर्यं दर्शयित्वा तत उत्तरतोग्ने-रन्योन्याभिमुखौ उपविश्य कस्य ब्रह्मचार्यसि इति मन्त्रेण वटुं प्राङ्मुखमुपवेश्य कुमारः परिसमूहनादि कृत्वा प्रजापतये स्वाहेति मनसोच्चार्य प्रादेशसंमितां समिधमादाय अग्नये समिधमिति मन्त्रेण अग्नय इदं न ममेत्युद्देश्यत्यागौ कृत्वा स ततोऽग्निं पाणिना स्पृष्ट्वा प्रक्षाल्य तत उद्दित्यमञ्जलिं विधाय हृदयं निमृज्य पाणिं प्रक्षाल्य पुनः अग्निं स्पृष्ट्वा श्रीयन्त्रोपनीय मम व्रतन्ते हृदयन्ते दधामीत्यादिमन्त्रेण स्वपाणिं मूर्धाञ्जलिं कुमारहृदये निधाय मेखलामादाय यदुरुक्ते-तिमन्त्रेण मेखलां बध्वा अदान्तदण्डयित्वेति दण्डं दत्वा ततो ब्रह्मचार्यसि अपोशान, कर्म कुरु, दिवा मा स्वाप्सीरित्याचार्याधीनो वेदमधीष्वेति प्रेषार्थं ज्ञापयन् ब्रह्मचर्यं द्वादशवर्षाणि वेदग्रहणान्तं ब्रह्मचर्यमात्रम् सायं प्रातर्भिक्षामट, तत्रैव समिधमाहरेति आचार्योपदेशानन्तरं पुनरादितः उपस्थायाग्निं प्रदक्षिणं कृत्वा आचार्यः स्विष्टकृदादिहोमशेषं समाप्य वटुर्भिक्षापात्रमादाय प्रथमं मातरं पितरं भगिनीं वा भवति भिक्षां भवतु ददातु इति वा आप्त व्याख्यायिनोऽन्यानपि वा भिक्षां याचयित्वा अनुप्रवचनीयहोम ब्राह्मणभोजनपर्याप्तं याचितं ब्रीह्यादि द्रव्यं गुरवे निवेद्य मध्याह्नसन्ध्यामुपास्य गुरुसन्निधावहः शेषं परिकल्पं सायं सन्ध्योपासनं विधायाग्निसन्निधौ आगत्योपविश्य प्राणायामं कृत्वा सायं समिदाधानं करिष्य इति संकल्प्य तत्र पूर्ववत्समिधमाधाय त्रिःमुखमवमृज्य मानस्तोकेतिमन्त्रेण विभूतिं धृत्वा पुनः परिसमूहनादि कृत्वाग्निं सम्प्रार्थ्य आचार्यः प्राणानायम्य उपनयनाङ्गभूतमनुप्रवचनीयहोमं करिष्य इति संकल्प्य स्थण्डिलोप-लेपनादि अग्निप्रतिष्ठानं विधायानुष्ठेयेऽनुप्रवचनीयहोमे अन्वाधानं विधायान्वाहितानौ अग्निप्रजापतिमित्यभिधाय परिसमूहनादि प्रणीतामोक्षान्तं कृत्वा चरु अवदानधर्मेण सदसस्पतिरित्यादित्रि-भिर्मन्त्रैर्हुत्वा स्विष्टकृदादिहोमशेषं समाप्यावशिष्टान्नेन त्र्यवरान् द्विजानाचार्यञ्च भोजयित्वा परतिवेदससमाप्तिरस्त्विति वाचयित्वा,

बन्धून् भोजयित्वा, स्वयमक्षारलवण भुक्त्वा ब्रह्मचारी द्वादशरात्रं त्रिरात्रं वाधःशायी, गुरुं प्रसाधयीतेति।

तदवत् [41]संस्कारतत्त्वकारेणापि संस्कारतत्वे गोभिलगृह्यसूत्रानुसारेण उपनयन कर्मस्यानुष्ठानप्रकाराः उपस्थाप्यते। तत्र उभयोः परिशीलनेन ज्ञायते यत् उभयत्र अनुष्ठानक्रमः प्रायः समानमेव केवलं गृह्यसूत्रयोः भेदत्वात् कतिपयक्षेत्रे मतभिन्नता परिलक्ष्यते।

परन्तु उभयत्र उद्देश्यन्तु समानमेव वालकस्य शैक्षणिकसंस्कारः।

**निष्कर्षः –** शैक्षिकसंस्कारेषु उपनयनसंस्कारः मानवजीवने अतिमहत्त्वपूर्णस्थानम् अधिक्रियते। उपनयनसंस्कारादनन्तरमेव मानवः गुरु-आचार्यादीनां समीपे गत्वा आचारादिशिक्षणपूर्वकम् वेदादि अध्ययनं कुर्यात्। तदर्थम् अत्र ग्रन्थकाराभ्याम् उपनयन-संस्कारस्यास्य कालविषये विविध ज्योतिषादिशास्त्रवचनानि समुत्थाप्य सम्यकतया प्रतिपादितानि। तथैव गृह्यसूत्रवचनानि समुत्थाप्य संस्काराणां अनुष्ठानप्रयोगक्रम-विषयेऽपि उल्लिखितानि। तत्सर्वम् अत्र मया संक्षेपेण उपस्थापितम्। इत्यलम्।

**सन्दर्भसूची**

1 सं.सा.पृ.- 58
2 तत्रैव- 59
3 सं.त.पृ.- 324
4 सं.सा.पृ.- 122
5 सं.त.पृ.- 324
6 सं.सा.पृ.- 123
7 तत्रैव- 122
8 योगी- आषोडशाद् द्वाविंशाच्चतुर्विंशाच्च वत्सरात्।
ब्रह्मक्षत्रविशां कालः औपनायनिकः स्मृतः।
असंस्कृता त्रयोप्येते सर्वधर्मबहिष्कृताः।
सावित्री पतिता व्रात्याः व्रात्यस्तोमाद् ऋते क्रतोः। इति। सं.सा.पृ.- 123
9 तत्रैव- 122
10 तत्रैव- 123
11 तत्रैव- 124
12 तत्रैव- 124
13 तत्रैव- 124
14 सं.त.पृ.- 325
15 सं.सा.पृ.- 125
16 तत्रैव- 125
17 सं.त.पृ.- 325
18 सं.सा.पृ.- 125
19 तत्रैव- 125
20 सं.त.पृ.- 325
21 सं.सा.पृ.- 125
22 सं.सा.पृ.- 126, सं.त.पृ.- 325
23 सं.त.पृ.- 325
24 स.सा.पृ.- 127
25 सं.त.पृ.- 325
26 सं.सा.पृ.- 128
27 तत्रैव- 128
28 सं.त.पृ.- 325
29 सं.सा.पृ.- 128
30 सं.त.पृ.- 325
31 सं.सा.पृ.- 128
32 तत्रैव- 130
33 करणे दक्षिणेनोर्ध्वंगतेन त्रिगुणीकृतम्।
वलितं यो नवं सूत्रं शास्त्र ऊर्ध्ववृतं स्मृतम्। इति। तत्रैव- 128
34 त्रिवृदूर्ध्वं कृतकार्यन्तन्तुत्रयमधोवृतम्।
त्रिवृतं चोपवीतं स्यात् तस्येको ग्रन्थिरिष्यते। इति। सं.सा.पृ.- 128
35 सं.सा.पृ.- 130, सं.त.पृ.- 325-326
36 सं.सा.पृ.- 130
37 सं.त.पृ.- 326
38 सं.सा.पृ.- 130, सं.त.पृ.- 326
39 सं.सा.पृ.- 130, सं.त.पृ.- 326
40 सं.सा.पृ.- 134-136
41 सं.त.पृ.- 326-328

**सन्दर्भग्रन्थसूची-**

➢संस्कारसारः, श्रीनृसिंहप्रसादः,
➢अष्टाविंशतितत्त्वम् (संस्कारतत्त्वम्), स्मार्त्तप्रवर श्रीरघुनन्दनः,